# परिभाषेन्दुशेखरः

(अन्ववेक्षणात्मकप्रश्नाः)

निर्देशः - निम्नेषु केचन पञ्चाशत् प्रश्ना एव समाधेयाः-

1) व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' अत्र लक्षणपदस्य कोऽर्थः?

2) कैयटमते सञ्ज्ञाविषये विप्रतिषेधसूत्रप्रवृत्तौ कुत्रत्यपरत्वं बीजम्?

3) अनुबन्धानामनवयवत्वे शित्किदित्यादौ कथं समासः?

4) दध्नचश्चकारस्य वैयर्थ्यं कस्मिन् पक्षे?

5) डादिप्रत्ययेषु डकारादीनामित्सञ्ज्ञा आदेशात्प्राङ् वा अनन्तरं वा?

6) उदीचां माङ इति निर्देशेन ज्ञापिता परिभाषा का?

7) प्रकरणस्याभिधानियामकत्वसिद्धादित्यत्र अभिधापदस्य कोऽर्थः?

8) उभयगतिरिह भवति अस्यां परिभाषायां किं ज्ञापकम्?

9) कार्यिणि कार्यानुभवकर्तृत्ववैशिष्ट्योपादानस्य किं फलम्?

10) तद्ग्रहणेन गृह्यन्ते इत्यत्र तद्ग्रहणेन इत्यस्य कोऽर्थः?

11) तद्गुणीभूता इत्यंशः कुत्र बीजम्?

12) यदागमपरिभषाया अनित्यत्वे किं फलम्?

13) स्थाननिरूपितसम्बन्धेन कस्य योगो भवति?

14) निर्दिश्यमानपरिभाषा "अलोऽन्त्यस्य" इति सूत्रस्य बाधिका न वा?

15) निर्दिश्यमानपरिभाषाया अवयवषष्ठीविषये प्रवृत्तौ किं फलम्?

16) गुणकृतान्तर्यस्य किमुदाहरणं ग्रन्थकृता दत्तम्?

17) "स्थानेऽन्तरतमः" इति सूत्रे स्थानपदस्यार्थः कः?

18) अर्थवद्ग्रहणे नानर्थकस्य" इत्यस्यां परिभाषायां कीदृशोऽर्थः गृह्यते?

19) "स्वं रूपं शब्दस्याशब्दसंज्ञा" इति सूत्रे स्वपदार्थः कः?

20) गौणमुख्ययोरिति परिभाषाघटकगौणशब्दे कस्मात्सूत्रात् कः प्रत्ययः?

21) गौणमुख्ययोरितिपरिभाषायां कीदृशं गौणत्वं गृह्यते?

22) गौणमुख्यन्यायः प्रातिपदिककार्ये प्रवर्तते न वा?

23) अनिनस्मिन्निति परिभाषा कुत्र पठिता?

24) एकयोगनिर्दिष्टानामिति परिभाषायां वा शब्दस्य कोऽर्थः?

25) ज्यादादित्यत्र दीर्घोच्चारणं कस्याः परिभाषायाः ज्ञापकम्?

26) गोहितमित्यत्र अवादेशः कुतो न?

27) उणाद्यन्तानां विषये पाणिनेः कः पक्ष इष्टः?

28) यत्र पञ्चम्यन्तात्परः प्रत्यय आश्रीयते तत्र कस्यांशस्योपस्थितिः?

29) "उगितश्चे"ति भाष्यप्रामाण्येन प्रत्ययग्रहणपरिभाषायाः कुत्र प्रवृत्तिः कुत्र च न?

30) "प्रत्ययग्रहणे चापञ्चम्या" इति परिभाषा कस्यापवादभूता?

31)"उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्" इति परिभाषायां किं प्रमाणम्?

32) स्त्रीप्रत्यये इत्यत्र सप्तम्याः कोऽर्थः?

33) स्त्रीप्रत्यये चानुपसर्जने इति परिभाषा कुत्र पठिता?

34) प्रत्ययग्रहणपरिभाषा पदसंज्ञाविषये कुतो न प्रवर्तते?

35) अक्तपरिमाणग्रहणे एकदेशविकृतमितिपरिभाषा प्रवर्तते न वा?

36) अर्थनिमित्तकस्य बहिरङ्गत्वाभावे किं प्रमाणम्?

37) असिद्धपरिभाषा त्रिपाद्यां कुतो न प्रवर्तते ?

38) येन नाप्राप्ते इत्यत्र येनेत्यत्र कस्मिन्नर्थे तृतीया?

39) अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इत्यत्र किं ज्ञापकम्?

40) "पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न" अस्यां परिभाषायां किं मानम्?

41) अभ्यासस्यासवर्णे इत्यत्रासवर्णग्रहणेन का परिभाषा ज्ञाप्यते?

42) "श्वः पक्ता"इत्यादौ लृटो व्यावृत्तिः कया परिभाषया?

43) "सूत्रे लिङ्गवचनमतन्त्रम्" इति परिभाषायां किं ज्ञापकम्?

44) नञिवयुक्तेतिपरिभाषार्थे घटकतया प्रविष्टस्य सादृश्यपदार्थस्य भेदाघटितत्वे को हेतुः नागेशेन प्रदर्शितः?

45) "पूर्वं ह्यपवादा अभिनिविशन्ते" अत्र अभिनिविशन्ते इत्यस्य कोऽर्थः?

46) "समर्थानाम् प्रथमाद्वा" इत्यत्र समर्थानामितिवचनेन ज्ञापिता परिभाषा का?

47) अन्तरङ्गेण अपवादः कदा बाध्यते?

48) "दीर्घोऽकितः" इत्यत्र अकिद्ग्रहणेन ज्ञापिता परिभाषा का?

49) "ताच्छीलिकेषु वासरूपविधिर्नास्ति" अस्यां परिभाषायां किं मानम्?

50) केषु वासरूपविधिर्नास्ति?

51) युवती: पश्य इत्यत्र "श्वयुवमघोनामतद्धिते" इति सम्प्रसारणं कया परिभाषया वार्यते?

52) "सूत्रे लिङ्गवचनमतन्त्रम्" अस्यां परिभाषायां किं ज्ञापकम्?

53) "बहुव्रीहौ तद्गुणसंविज्ञानमपि" अत्र अपिना किं सङ्गृह्यते?

54) "तृतीया च होश्छन्दसि" इत्यत्र चकारेण किमनुकृष्यते?

55) स्वरविधौ व्यञ्जनमविद्यमानवदित्यत्र किं ज्ञापकम्?

56) "णच: स्त्रियामि"ति सूत्रे स्त्रियामितिवचनेन का परिभाषा ज्ञाप्यते?

57) तन्मध्यपतितन्यायस्य ज्ञापकं किमुक्तं परिभाषेन्दुशेखरे?

58) विश्वसेदित्यत्र शपो लुक् कुतो न?

59) "विपराभ्यां जे:" इत्यत्र विशब्दसाहचर्याद् कीदृश: पराशब्दो गृह्यते?

60) लक्षणप्रतिपदोक्तपरिभाषा वर्णग्रहणे प्रवर्तते न वा?